संस्कृत वार्ता:

13.07.2025

प्रात: - 06:55

## प्रधानमन्त्री वृत्यर्थ-मेलापकम्

युवभ्य: वृत्यवसरान् प्रदातुं विकासं प्राप्तुं, सर्वकारस्य आकांक्षानुरूपं षोडशतम: वृत्यससर-मेलापक: गतदिने समनुष्ठित:। एतद्- मेलापकावसरे, प्रधानमन्त्री नरेन्द्रमोदी विभिनेषु सर्वकारीयविभागेषु संस्थासु च नवनियुक्तेभ्य: कर्मिभ्य: एकपञ्चाशत्सहस्राधिकानि नियुक्तिपत्राणि अन्तर्जालीय माध्यमेन वितरितवान्। कार्यक्रमावसरे प्रधानमन्त्री नरेन्द्रमोदी नवनियुक्तकर्मिण: सम्बोधितवान्। दृश्यश्रव्य-परात्मके अन्तर्जालीय -स्वीय-सम्बोधने प्रधानमन्त्री नरेन्द्रमोदी तान् कर्मिण: वर्धापितवान्, प्रोक्तवान् च यत् सर्वकारस्य वृत्यवसर-मेलापक-पदक्षेपेण लक्षाधिका: युवान: केन्द्रीय विभागेषु संस्थासु च वृत्यवसरान् प्राप्तवन्त:।

## प्रवर्तन-निदेशायलेन

पीएसीएल इति समवायस्य निदेशकान् संचालकान् च विरूध्य प्रवर्तमान-अन्वेषणक्रमे द्विषष्ट्युत्तर-सप्तशतं कोटितोप्यधिकमिता: सम्पत्तय: समनुगृहीता:। एता: सम्पत्तय: पंजाब-हरियाणा-दिल्ली-महाराष्ट्र-आस्ट्रेलिया-इत्यत्र स्थिता: सन्ति।

## निर्वाचनायोग-बिहार:

निर्वाचायोगेन बिहार-प्रदेशे प्रायश: सर्वे: मतदातृभि: साकं सम्पर्क: संसाधित:। अथ बिहार-प्रदेशे प्रायश: अशीति-प्रतिशिन्मिता: मतदातार: स्वीय गणनाप्रपत्रं निर्वाचनायोगाय दत्तवन्त:। निर्वाचायोगेन विज्ञापितं यत् निर्धारितात् समयात् पूर्वमेव गणना-प्रपत्र-संग्रहणाय कार्यं प्रर्वतते।

## अखिल-भारतीय-आयुर्वेद संगोष्ठी

अखिल-भारतीय-आयुर्वेद-संस्थानेन अद्य प्रभृति शल्यकॉन विंशति:पञ्चविंशति: इत्याख्या त्रिदिवसीया राष्ट्रिय-संगोष्ठी नवदेहल्यां समायोज्यते। एषा संगोष्ठी सुश्रुत-जयन्तीमालक्ष्य समायोज्यते। अवद्येयं यत् शल्य-चिकित्साया: जनकस्य आचार्य सुश्रुतस्य जयन्ती प्रतिवर्षं जुलाई

मासे पंचदशे दिनांके आमान्यते। अत्रावसरे सामान्यशल्य चिकित्सासहितं नैकानि शल्यचिकित्सा-प्रदर्शनानि भवितार:।

<u>अहमदाबादविमानदुर्घटना</u>

अहमदाबादविमानदुर्घटना विषये विमानदुर्घटना-अनुसन्धान-ब्यूरो-संस्थया प्रारम्भिकं पञ्चदश-पृष्ठात्मकं प्रतिवेदनं प्रकाशितम्। अहमदाबादनगरे जूनमासस्य द्वादशे दिनाङ्के संजातायाः एयर इण्डिया ड्रीमलाइनर-विमानदुर्घटनायाः प्रारम्भिक-अन्वीक्षण-प्रतिवेदनं प्रकाशितम् अस्ति तथा च एतत् प्रतिवेदनानुसारं विमानस्य उड्डयनानन्तरं कतिपयेषु निमिष-अनन्तरमेव विमानस्य यान्त्रिकद्वयं वायौ एव स्थगितम्, तदनन्तरं एषा दुर्घटना जाता। तस्मिन् एव काले प्रतिवेदनात् पूर्वं अस्मिन् विषये संशयाः उत्पद्यन्ते स्म, अधुना प्रतिवेदनस्य अनन्तरं तेषां पुष्टिः अभवत् ।

<u>क्रिकेट्</u>

क्रिकेट्-क्रीडायां एंडरसेन-तेंदुलकर-प्रतिस्पर्धायां तृतीय-निकष-स्पर्धाया: चतुर्थ-दिवसात्मिकी क्रीडा अद्य क्रीडिष्यते। लॉर्डस- क्रीडांगणे भारतीय-समयानुसारं मध्याह्ने सार्ध-त्रिवादने एतत् समारभेत।एतत् पूर्वं गतदिने तृतीय-दिवसस्य क्रीडा समाप्तिं यावत् इंग्लैण्डदलेन स्तोभहानिं विना द्वितीय-पाल्यां द्वि-धावनांका: समधिगता:। एतत् पूर्व भारतस्य प्रथमा पाली सप्ताशीत्युत्तर-त्रिशतं धावनांकेषु समाप्ता जाता, यत्र के एल राहुल: शतकीयं धावनांकप्रदर्शनं कृतम्। साम्प्रतं पञ्चस्पर्धात्मिका एषा निकष स्पर्धामालिका समत्वं भजते।

।। इति वार्ता:।।